# શ્રીશઙ્કરાર્યપદાવલમ્બસ્તવઃ

Shri Shankararyapadavalambastavah

sanskritdocuments.org

November 10, 2018

# Shri Shankararyapadavalambastavah

# શ્રીશઙ્કરાર્યપદાવલમ્બસ્તવઃ

## Sanskrit Document Information

Text title : shankarAryapadAvalambastavaH

File name : shankarAryapadAvalambastavaH.itx

Category : deities_misc, sachchidAnanda-shivAbhinava-nRisiMhabhAratI, gurudeva

Location : doc_deities_misc

Author : Sachchidananda Shivabhinava Nrisimha Bharati Swamigal

Proofread by : PSA Easwaran psawaswaran at gmail.com

Latest update : November 9, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

November 10, 2018

*sanskritdocuments.org*

# શ્રીશઙ્કરાર્યપદાવલમ્બસ્તવઃ

(કાલટિક્ષેત્રે ) ॥

નાકાદિલોકવિરતિઃ પ્રભવેદ્દૃઢા ય-
દ્વાક્યામૃતશ્રવણતોઽપ્યતિકામુકસ્ય ।
સ ત્વં વિરક્તિદ જવાત્પદનમ્રપઙ્ક્ત્યૈ
શ્રીશઙ્કરાર્ય મમ દેહિ પદાવલમ્બમ્ ॥ ૧॥

અન્નાસુચિત્તમુખકોશવિવેચનેન
તત્ત્વં પરં દ્રુતતરં પ્રતિબોધયંસ્ત્વમ્ ।
મોક્ષપ્રદાયક પદામ્બુજસન્નતેભ્યઃ
શ્રીશઙ્કરાર્ય મમ દેહિ પદાવલમ્બમ્ ॥ ૨॥

ક્લેશાન્નિવાર્ય કૃપયા તરસાસ્મિતાદીન્
પઞ્ચાપિ સાધનચતુષ્ટયમાશુ દત્ત્વા ।
બુદ્ધિં વિચારપરમાં પ્રવિધાય સમ્યક્
શ્રીશઙ્કરાર્ય મમ દેહિ પદાવલમ્બમ્ ॥ ૩॥

બદ્ધ્વા ત્વદઙ્ઘ્રિસરસીરુહભક્તિરજ્જ્વા
ચેતઃકપિં વિષયકણ્ટકપાદપેષુ ।
છાયાફલાદિરહિતેષુ વૃથા ચરન્તં
શ્રીશઙ્કરાર્ય મમ દેહિ પદાવલમ્બમ્ ॥ ૪॥

પ્રાણૈર્વિહીનતનયં તરસા સમીપ-
માનીય રોદનકરૌ પિતરૌ સમીક્ષ્ય ।
યઃ પ્રાતનોદસુયુતં તનયં હિ સ ત્વં
શ્રીશઙ્કરાર્ય મમ દેહિ પદાવલમ્બમ્ ॥ ૫॥

ભટ્ટાદિભાસ્કરસિતેતરકણ્ઠમુખ્યાન્
વાદે વિજિત્ય કુતુકાદ્વિદુષાં વરેણ્યાન્ ।

અદ્વૈતમાર્ગપરિરક્ષણજાગરૂક
શ્રીશઙ્કરાર્ય મમ દેહિ પદાવલમ્બમ્ ॥ ૬॥

શ્રીમત્પ્રણીતશુકતાતમુનીન્દ્રસૂત્ર-
ભાષ્યાદિપાઠનવિધાવધિકં પટુત્વમ્ ।
દત્વાપિ શૂન્યપરિમાણજડત્વવાર્ધેઃ
શ્રીશઙ્કરાર્ય મમ દેહિ પદાવલમ્બમ્ ॥ ૭॥

ભાષ્યાખ્યપુષ્પરસપૂર્ણમુખારવિન્દ-
નમ્રાન્તરઙ્ગમધુકૃત્પરિતુષ્ટિદક્ષ ।
રુદ્રાક્ષકણ્ઠ નિજનીલગલત્વસિદ્ધ્યૈ
શ્રીશઙ્કરાર્ય મમ દેહિ પદાવલમ્બમ્ ॥ ૮॥

આસ્તિક્યરત્નમિહ પુણ્યચયેન લભ્યં
કલ્યમ્બુધૌ નિપતિતં તરસાઽર્યપાદ ।
ઉદ્ધૃત્ય તેન પરિપાલય લોકમેનં
શ્રીશઙ્કરાર્ય મમ દેહિ પદાવલમ્બમ્ ॥ ૯॥

યોગપ્રદાયક જવાન્નતમસ્કરિભ્યો
ભોગપ્રદાથ ગૃહિણામવિરક્તિભાજામ્ ।
કાલસ્મયાપહ વિપાપજનેઽપ્યપાદ
શ્રીશઙ્કરાર્ય મમ દેહિ પદાવલમ્બમ્ ॥ ૧૦॥

છિન્નેઽપિ શસ્ત્રનિચયૈર્બહુધા શરીરે
ખેદં ન કઞ્ચિદપિ યાતિ યથા મનો મે ।
તદ્વત્સ્થિરાં કુરુ મતિં સુખચિત્સ્વરૂપે
શ્રીશઙ્કરાર્ય મમ દેહિ પદાવલમ્બમ્ ॥ ૧૧॥

અન્યૈર્ભિષગ્ભિરનિવાર્યમહાઽઽમયં મે
યસ્માત્ત્વમાદ્યભિષગસ્યચિરાન્નિવાર્ય ।
અજ્ઞાનસંજ્ઞમતિનિશ્ચલબોધદાના-
ચ્છ્રીશઙ્કરાર્ય મમ દેહિ પદાવલમ્બમ્ ॥ ૧૨॥

વાતાવધૂતવરુણાલયભઙ્ગગર્વ-
ભઙ્ગપ્રચણ્ડવચસઃ પ્રભવન્તિ યત્તે ।
મૂકા અપિ પ્રણમનાત્પદયોઃ સકૃત્ત-
ચ્છ્રીશઙ્કરાર્ય મમ દેહિ પદાવલમ્બમ્ ॥ ૧૩॥

લીનં તથા કુરુ મનઃ પરમાર્થવસ્તુ-
ન્યૈક્યાવબોધનવશાન્મમ નિઃસરેન્ન ।
યદ્વત્પુનઃ પરમકારુણિકાગ્રગણ્ય
શ્રીશઙ્કરાર્ય મમ દેહિ પદાવદ્ધ્યબમ્ ॥ ૧૪॥

સંન્યાસિનાં હિ વિષવદ્વિષયેષુ બુદ્ધિં
તન્વસ્તથા ચ ગૃહિણાં શુભકર્મવાઞ્છામ્ ।
સર્વાન્ક્રમેણ ચ પરં પદમાપયંસ્ત્વં
શ્રીશઙ્કરાર્ય મમ દેહિ પદાબલમ્બમ્ ॥ ૧૫॥

યત્પાદપઙ્કજનતેરપિ જાતુ મૂક-
લોકોઽપિ દિવ્યકવિતામયતે હિ તૂર્ણમ્ ।
સ ત્વં તવ સ્તુતિકૃતે કવિતાં વિતીર્ય
શ્રીશઙ્કરાર્ય મમ દેહિ પદાવલમ્બમ્ ॥ ૧૬॥

આકર્ણ્ય દીનગૃહિણીવચનં કૃપાર્દ્રઃ
સ્વર્ણાત્મકામલકસન્તતિમાસમન્તાત્ ।
ગેહસ્ય યોઽતિતરસા હિ વવર્ષ સ ત્વં
શ્રીશઙ્કરાર્ય મમ દેહિ પદાવલમ્બમ્ ॥ ૧૭॥

આનેષ્ટ દૂરગનદીં જનનીહિતાય
યો બાલ્ય એવ જગતાં હિતકૃત્સ્વભાવઃ
સ ત્વં સમસ્તજનરક્ષણબદ્ધદીક્ષ
શ્રીશઙ્કરાર્ય મમ દેહિ પદાવલમ્બમ્ ॥ ૧૮॥

મોહાદ્વૃથા વિરસગન્ધવિહીનશબ્દ-
સ્પર્શાખ્યપુષ્પચલનાદતિખેદભાજમ્ ।
હૃદ્ભૃઙ્ગમાત્મપદપદ્મગતં વિધાય
શ્રીશઙ્કરાર્ય મમ દેહિ પદાવલમ્બમ્ ॥ ૧૯॥

સર્વાન્સ્વકીયમતતત્ત્વપરીક્ષણેચ્છૂ-
સ્તત્તન્મતાર્થકથનેન વિજિત્ય મોદમ્ ।
સર્વજ્ઞપીઠમધિરુહ્ય ય આપ સ ત્વં
શ્રીશઙ્કરાર્ય મમ દેહિ પદાવલમ્બમ્ ॥ ૨૦॥

શાન્ત્યાદિસાધનવતા પુરુષોત્તમેન

સમ્પ્રાપ્ય સદ્ગુરુમતઃ શ્રવણાદિ કૃત્વા ।
યઃ પ્રાપ્યતે વિમલબોધતનુર્હિ સ ત્વં
શ્રીશઙ્કરાર્ય મમ દેહિ પદાવલમ્બમ્ ॥ ૨૧॥

શ્રીનાથશમ્ભુવિધિશુદ્ધપરાત્મરૂપ
કાશાન્તચઞ્ચલહૃદાં પદસન્નતાનામ્ ।
પાષાણનિશ્ચલમનસ્ત્વનિધાનદક્ષ
શ્રીશઙ્કરાર્ય મમ દેહિ પદાવલમ્બમ્ ॥ ૨૨॥

રાજીવપાદમુખલભ્યમનન્તપુણ્યૈ
રાજાધિરાજનિચયાર્થિતમન્વહં ચ ।
નિર્વ્યાજપૂર્ણકૃપયાસ્ય વરાકરાજઃ
શ્રીશઙ્કરાર્ય મમ દેહિ પદાવલમ્બમ્ ॥ ૨૩॥

વાચોऽપિ ચિત્તસહિતા ન હિ યત્ર ગન્તું
શક્ષ્યન્તિ તદ્વિષયતાં કથમેતિ વસ્તુ ।
ત્યક્ત્વા કૃપાં ગુરુવરસ્ય હિ ચિત્સ્વરૂપ
શ્રીશઙ્કરાર્ય મમ દેહિ પદાવલમ્બમ્ ॥ ૨૪॥

જાડ્યામ્બુધૌ નિરવધૌ દૃઢમગ્નમગ્ન-
મત્યન્તવિસ્મૃતચિદાત્મસુખસ્વરૂપમ્ ।
ઉદ્ધૃત્ય ધીરશનયા તરસા કૃપાબ્ધે
શ્રીશઙ્કરાર્ય મમ દેહિ પદાવલમ્બમ્ ॥ ૨૫॥

હસ્તામ્બુજં શિરસિ હેતુવિહીનપૂર્ણ-
કારુણ્યતોऽતિતરસા વિનિધાય મત્કે ।
સ્વારાજ્યમાશુવિતરાત્મપદેऽભિષિચ્ય
શ્રીશઙ્કરાર્ય મમ દેહિ પદાવલમ્બમ્ ॥ ૨૬॥

માતા પિતા ચ ભગિની તનુજશ્ચ જાયા
નૈવાશ્રયાય પુરુષસ્ય ભવન્તિ કાલે ।
એકં વિના ગુરુવરાઙ્ઘ્રિપયઃપ્રભૂતં
શ્રીશઙ્કરાર્ય મમ દેહિ પદાબલમ્બમ્ ॥ ૨૭॥

સમ્પ્રાપ્તયોગસરણિં સદસદ્વિવેક-
દક્ષં દમાદિગુણસમ્ભૃતમાનસં ચ ।
કૃત્વા સરોજભવચિત્તપયોજભાનો

શ્રીશઙ્કરાર્ય મમ દેહિ પદાબલમ્બમ્ ॥ ૨૮॥

શ્રીશઙ્કરેતિ સતતં પરિકીર્તયન્તિ
પાદામ્બુજં પરગુરોર્હૃદિ ચિન્તયન્તિ ।
યે વૈ ત એવ સુખિનઃ પુરુષા હિ લોકે
શ્રીશઙ્કરાર્ય મમ દેહિ પદાવલમ્બમ્ ॥ ૨૯॥

માત્સર્યમુખ્યભયહેતુમૃગાવકર્ણે
સઙ્કલ્પનામકમહાજવપક્ષિયુક્તે ।
સ્વાન્તાખ્યઘોરવિપિને ચરતઃ કૃપાબ્ધે
શ્રીશઙ્કરાર્ય મમ દેહિ પદાવલમ્બમ્ ॥ ૩૦॥

વર્ણાશ્રમાદિપરિપાલનસક્તિમાશુ
દત્ત્વા દૃઢાં નૃપતતેરપિ ભૂયસીં ચ ।
શ્રદ્ધાં શ્રુતિસ્મૃતિતતિષ્વચલાં ચ લક્ષ્મીં
શ્રીશઙ્કરાર્ય મમ દેહિ પદાવલમ્બમ્ ॥ ૩૧॥

આદૌ તુ સાધનચતુષ્ટયહેતુભૂતં
પશ્ચાચ્છ્રુતાર્થપરિચિન્તનસાધનં ચ ।
અન્તે ચ દૃશ્યરહિતાત્મસુખપ્રદં તે
શ્રીશઙ્કરાર્ય મમ દેહિ પદાવલમ્બમ્ ॥ ૩૨॥

વિદ્યાનિધે વિશદિતાનતચિત્તપદ્મ
વિદ્યાપ્રદાનનિરતાઙ્ઘ્રિસરોજપૂજ ।
વિષ્ણ્વીશભેદમતિવારણપઞ્ચવક્ત્ર
શ્રીશઙ્કરાર્ય મમ દેહિ પદાવલમ્બમ્ ॥ ૩૩॥

દક્ષેણ પાણિકમલેન વિબોધમુદ્રા-
મન્યેન નમ્રવરદાનસમર્થચિહ્નમ્ ।
બિભ્રાણપદ્મનિભનેત્ર કૃપામ્બુરાશે
શ્રીશઙ્કરાર્ય મમ દેહિ પદાવલમ્બમ્ ॥ ૩૪॥

શ્રીકાલટીધરણિભૂષણભૂતજન્મન્
જન્માદિદુઃખવિનિવારણબદ્ધદીક્ષ ।
કારુણ્યપૂર્ણનયનાવનિદેવભાગ્ય
શ્રીશઙ્કરાર્ય મમ દેહિ પદાવલમ્બમ્ ॥ ૩૫॥

વેદાવિરુદ્ધમતસાધનબદ્ધદીક્ષ
વાદે વિજિત્ય તરસા ક્ષિતિમણ્ડલં યઃ ।
અદ્વૈતરક્ષણમહો કૃતવાંશ્ચ સ ત્વં
શ્રીશઙ્કરાર્ય મમ દેહિ પદાવલમ્બમ્ ॥ ૩૬॥

ત્તત્ત્વાર્થબોધનવિહીનહૃદમ્બુજસ્ય
રાગાદિદોષપરિપૂરિતચેતસો મે ।
તત્ત્વં વિબોધ્ય વિનિવાર્ય ચ રાગરોગં
શ્રીશઙ્કરાર્ય મમ દેહિ પદાબલમ્બમ્ ॥ ૩૭॥

ઇતિ શૃઙ્ગેરિ શ્રીજગદ્ગુરુ શ્રીસચ્ચિદાનન્દશિવાભિનવનૃસિંહ-
ભારતીસ્વામિભિઃ વિરચિતઃ શ્રીશઙ્કરાર્યપદાવલમ્બસ્તવઃ સમ્પૂર્ણઃ ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

*Shri Shankararyapadavalambastavah*
pdf was typeset on November 10, 2018

Please send corrections to *sanskrit@cheerful.com*